# <u>आदित्य हृदय स्तोत्र</u>

**ततो युद्धपरिश्रान्तं समरे चिन्तया स्थितम् ।**

**रावणं चाग्रतो दृष्ट्वा युद्धाय समुपस्थितम् ।। 1 ।।**

**दैवतैश्च समागम्य द्रष्टुमभ्यागते रणम्।**

**उपागम्याब्रवीद्राममगस्त्यो भगवांस्तदा।।2 ।।**

**राम राम महाबाहो ! शृणु गुह्यं सनातनम् ।**

**येन सर्वानरीन्वत्स ! समरे विजयिष्यसे**

**आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनम् ।**

**जयावहं जपं नित्यमक्षयं परमं शिवम् ।।4।।**

**सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ।**

**चिन्ताशोकप्रशमनमायुर्वर्धनमुत्तमम् ।।5 ।।**

**रश्मिमन्तं समुद्यन्तं देवासुरनमस्कृतम् ।**

**पूजयस्व विवस्वन्तं भास्करं भुवनेश्वरम्।।6 ।।**

सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः

एष देवासुरगणांल्लोकान्पाति गभस्थिभिः।।7 ||

एष ब्रह्मा च विष्णुश्च शिवः स्कन्दः प्रजापतिः

महेन्द्रो धनदः कालो यमः सोमो ह्यपाम्पतिः।।8।।

पितरो वसवः साध्या अश्विनौ मरुतो मनुः ।

वायुर्वह्निः प्रजाः प्राण ऋतुकर्ता प्रभाकरः ।।9 ।

आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान् ।

सुर्वणसदृशो भानुर्हिरण्यरेता दिवाकरः।।10 ।।

हरिदश्वःसहस्रार्चिः सप्तसप्तिमरीचिमान् ।

तिमिरोन्मथनः शम्भुस्त्वष्टा मार्तण्डकोंऽशुमान् ।।1 1 ।।

हिरण्यगर्भः शिशिरस्तपनोऽहस्करो रविः।

अग्निगर्भोऽदितेः पुत्रः शङ्खः शिशिरनाशनः ।।1 2 ।।

व्योमनाथस्तमोभेदी ऋग्यजुः सामपारगः।

घनवृष्टिरपां मित्रो विन्ध्यवीथीप्लवङ्गमः ।।1 3 ।।

आतपी मण्डली मृत्युः पिङ्गलः सर्वतापनः ।

कविर्विश्वो महातेजा रक्तः सर्वभवोद्भवः।।1 4 ।।

नक्षत्रग्रहताराणामधिपो विश्वभावनः ।

तेजसामपि तेजस्वी द्वादशात्मन्नमोऽस्तु ते।।1 5 ।।

नमः पूर्वाय गिरये पश्चिमायाद्रये नमः।

ज्योतिर्गणानां पतये दिनाधिपतये नमः ।।1 6 ।।

जयाय जयभद्राय हर्यश्वाय नमो नमः।

नमो नमः सहस्रांशो! आदित्याय नमो नमः ।।17

नमः उग्राय वीराय सारङ्गाय नमो नमः ।

नमः पद्मप्रबोधाय प्रचण्डाय नमोऽस्तु ते।।18 ।।

ब्रह्मेशानाच्युतेशाय सूरायादित्यवर्चसे।

भास्वते सर्वभक्षाय रौद्राय वपुषे नमः।।19 ।।

तमोघ्नाय हिमघ्नाय शत्रुघ्नायामितात्मने ।

कृतघ्नघ्नाय देवाय ज्योतिषां पतये नमः ।।20 ।।

तप्तचामीकराभाय हरये विश्वकर्मणे।

नमस्तमोऽभिनिघ्नाय रुचये लोकसाक्षिणे।।21 ।।

नाशयत्येष वै भूतं तमेव सृजति प्रभुः ।

पायत्येष तपत्येष वर्षत्येष गभस्तिभिः ।।22 ।।

एष सुप्तेषु जागर्ति भूतेषु परिनिष्ठितः ।

एष चैवाग्निहोत्रं च फलं चैवाग्निहोत्रिणाम् ।।23।।

देवाश्च क्रतवश्चैव क्रतूनां फलमेव च।

यानि कृत्यानि लोकेषु सर्वेषु परमप्रभुः ।।24 ।।

एनमापत्सु कृच्छ्रेषु कान्तारेषु भयेषु च।

कीर्तयन् पुरुषः कश्चिन्नावसीदति राघव ।।25 ।।

पूजयस्वैनमेकाग्रो देवदेवं जगत्पतिम् ।

एतत्त्रिगुणितं जप्त्वा  युद्धेषु विजयिष्यसि ।।26 ।।

अस्मिन्क्षणे महाबाहो! रावणं त्वं जहिष्यसि ।

एवमुक्त्वा ततोऽगस्त्यो जगाम स यथागतम् ।।27 ।।

एतच्छ्रुत्वा महातेजा नष्टशोकोऽभवत्तदा।

धारयामास सुप्रीतो राघवः प्रयतात्मवान् ।।28।।

आदित्यं प्रेक्ष्य जप्त्वेदं परं हर्षमवाप्तवान् ।

त्रिराचम्य शुचिर्भूत्वा धनुरादाय वीर्यवान् ।।29।।

रावणं प्रेक्ष्य हृष्टात्मा जयार्थं समुपागतम्।

सर्वयत्नेन महता वृतस्तस्य वधेऽभवत्।।3 0 ।।

रविरवदन्निरीक्ष्य राम मुदितमनाः परमं प्रहृष्यमाणः।

**निशिचरपतिसंक्षयं विदित्वा सुरगणमध्यगतो वचस्त्वरेति ।।31 ।।**


**[www.astromanu.com](http://www.astromanu.com)**

**mob no-7983298169**